# શ્રીપદ્મનાભસ્તોત્રમ્

Shri Padmanabhastotram

sanskritdocuments.org

November 10, 2018

# Shri Padmanabhastotram

# શ્રીપદ્મનાભસ્તોત્રમ્

## Sanskrit Document Information

Text title : padmanAbhastotram

File name : padmanAbhastotram.itx

Category : vishhnu, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_vishhnu

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીપદ્મનાભસ્તોત્રમ્

(શ્રીમદનન્તપદ્મનાભક્ષેત્રે)

પદ્મનાભ કરુણામૃતરાશે સદ્મહેતુલવશૂન્યકૃપાયાઃ ।
છદ્મહારિતમહાબલિસમ્પદ્વિદ્મ એવ તવ વીર્યમનન્તમ્ ॥ ૧॥

નાભ્યાઃ સરસ્ત્વેન હિ વર્ણનં તુ સત્યં તદા સ્યાત્કિલ પદ્મનાભ ।
યદા ત્વદીયં વિષયીકરોતિ નાભિં ન ચેદ્યાતિ કથં પ્રમાત્વમ્ ॥ ૨॥

નાભીપદ્મે પુત્રં વક્ષસિ કાન્તાં ચ સન્દધત્તાન્તઃ ।
સ્વપિષિ સદા કિં વિષ્ણો નમ્રાયાસ્મૈ દ્રુતં બ્રૂહિ ॥ ૩॥

પાપાબ્ધૌ બડવાનલસ્ય હિ શિખા જાડ્યાન્ધકારે રવિઃ
ભાગ્યાબ્ધૌ શરદિન્દુપઙ્ક્તિરમલા ત્વન્નામસઙ્કીર્તનમ્ ।
ભક્તાનાં પરિપોષણે ચ જનની સ્વાત્માવબોધે પિતા
કસ્તસ્માદ્વિમુખો ભવેદ્ભુવિ નરો નો ચેન્મહાપાપભાક્ ॥

ક્ષીરામ્ભોનિધિરાજમાનફણિરાણ્મધ્યે શયાના સદા
લક્ષ્મીપાણિપયોજમર્દિતપદા કારુણ્યવારાન્નિધિઃ ।
કુર્વાણા મધુના ચ કૈટભયુજા યુદ્ધં ચ દોર્ભ્યાં મુહુ-
ર્મુદ્રા કાચન મુક્તિદાનકુશલા નિદ્રાતિ જાગર્તિ વા ॥

પદ્મનાભ તવ પાદસરોજાસક્તચિત્તમવનીપતિમેનમ્ ।
પાહિ સાશ્રિતસબન્ધુસવિદ્વલ્લોકમાદરભરેણ સરાષ્ટ્રમ્ ॥ ૬॥

સામોદં પ્રદિશન્તુ વઞ્ચિકુલભૂમૂલર્ક્ષરાજાય વાગ્-
દેવીચન્દ્રકલાધરેભવદનાઃ કારુણ્યવારાશયઃ ।
દીર્ઘાયુર્દૃઢગાત્રતામલયશાંસ્યાચન્દ્રતિગ્માંશુભં
ધર્માધ્વન્યધિકાં પ્રવૃત્તિમચલામચ્છિન્નસત્સન્તતિમ્ ॥ ૭॥

પાયાસુર્જગદમ્બકેન્દુવિલસચ્છીર્ષેભવક્ત્રાઃ સદા
રાજ્ઞ્યૌ કેરલદેશભાગ્યલતિકે કારુણ્યયુગ્ભિર્મુદા ।

દૃગ્ભિઃ પાદવિનમ્રસૌખ્યવિતતેઃ સમ્પાદિકાભિર્જવાદ્-
દત્ત્વા સન્તતિમાશુ સદ્ગુણયુતામારોગ્યદીર્ઘાયુષી ॥ ૮॥

મોચિતઃ કિં ગજાધીશ પદ્મનાભેન સત્વરમ્ ।
દૃઢભાવનયા તસ્ય પદ્મનાભોઽભવદ્ગજેટ્ ॥ ૯॥

શ્રીભૂમિપાણિસરસીરુહસેવિતાઙ્ઘ્રે
શ્રીવત્સકૌસ્તુભધર પ્રણતાર્તિહારિન્ ।
શ્રીકણ્ઠમિત્ર દિનનાથસુધાંશુનેત્ર
શ્રીપદ્મનાભ મમ દેહિ પદાવલમ્બમ્ ॥ ૧૦॥

નાગેન્દ્રભોગશયન પ્રણતાલિવાઞ્છા-
સમ્પૂરણામરતરો વિધિયોનિનાભે ।
નાકાધિપાદિપરિપૂજિતપાદપદ્મ
શ્રીપદ્મનાભ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૧॥

કમલાકરપદ્મપૂજિતં કરુણાદુગ્ધપયોધિમધ્યગમ્ ।
ભુજગાધિપભોગશાયિનં કલયે કઞ્ચન દેવસત્તમમ્ ॥ ૧૨॥

ઇતિ શ્રીશૃઙ્ગેરી જગદ્ગુરુ શ્રીસદાશિવાભિનવનૃસિંહભારતી-
શ્રીપાદૈઃ વિરચિતં શ્રીપદ્મનાભસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Padmanabhastotram*
pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*